SN – 154

- 29 -

**III Semester B.B.M. Examination, Nov./Dec. 2013**
**(Freshers and Repeaters) (2012-13 and Onwards)**
**SANSKRIT LANGUAGE – III**
**Drama and Composition : Balacharitam and Composition**

Time : 3 Hours Max. Marks : 100

***Instructions :*** *1) Answer in **Sanskrit, Kannada** or **English**.*
*2) Questions **I** and **VII** should be answered in **Sanskrit** only.*

I. पञ्चदशप्रश्नानामुत्तरं **एकैकवाक्येन संस्कृत**भाषया लिखत। **(1×15=15)**

ಹದಿನೈದು ಪ್ರಶ್ನೆಗಳಿಗೆ ಒಂದೊಂದು ವಾಕ್ಯದಲ್ಲಿ ಉತ್ತರವನ್ನು ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯಿರಿ :

Answer **fifteen** questions in **Sanskrit** only.

ST. CLARET COLLEGE LIBRARY

1) बालचरितनाटकस्य कर्ता क: ?

2) गगनसञ्चारी क: ?

3) बालचरिते प्रतिपाद्यं वस्तु किम् ?

4) त्रिलोककेतु: क: ?

5) अपक्रमण हेतो: केन प्रभा कृता ?

6) कालवर्षसम्पूर्णा का स्थिता ?

7) वसुदेव: कुत्र प्रभातवेलां प्रतिपालयति ?

8) नन्दगोपस्य पत्नी का ?

9) कात्यायनी का ?

10) शाप: कस्मात् प्रदेशादागत: ?

11) वायसपक्षवात: किं न कम्पयितुं समर्थ: ?

12) कस्य आज्ञा अनतिक्रमणीया इति राजश्री: वदति ?

13) कस्य जन्मनि विशेषकरो विकार: ?

14) शौरसेनीमाता का ?

15) स्त्रीणामधिकतर: स्नेहो कासु भवति ?

16) कंसाय क: शापं दत्तवान् ?

P.T.O.

17) शकटवेषं गृहीत्वा क: आगत: ?

18) यमलार्जुनौ कौ ?

19) गोपकन्यकाभि: दामोदर: किं प्रक्रीडितुमागच्छति ?

20) यमुनाह्रदे पानीयं पीत्वा के के विम्रियन्ते ?

II. द्वौ अधिकृत्य प्रबन्धरूपेण उत्तरं लिखत। **(2×12=24)**

ಯಾವುದಾದರೂ **ಎರಡನ್ನು** ಕುರಿತು ಪ್ರಬಂಧ ರೂಪದಲ್ಲಿ ಉತ್ತರಿಸಿ :

Write an essay on **any two** of the following :

1) बालचरितनाटकस्य द्वितीयाङ्कमधिकृत्य सविमर्शं प्रबन्धं लिखत।
ಬಾಲಚರಿತ ನಾಟಕದ ಎರಡನೆಯ ಅಂಕದ ವಿಮರ್ಶಾತ್ಮಕ ಪ್ರಬಂಧ ಬರೆಯಿರಿ.
Write a critical essay on the second act of the drama Bālacharitam.

2) भासमहाकवे: देशकालकृती:–उद्दिश्य प्रबन्धं लिखत।
ಭಾಸಮಹಾಕವಿಯ ದೇಶ, ಕಾಲ, ಕೃತಿಗಳನ್ನು ಉದ್ದೇಶಿಸಿ ಪ್ರಬಂಧ ಬರೆಯಿರಿ.
Write an essay on the life, date and works of the poet Bhāsa.

3) वसुदेवस्य पात्रचित्रणं कुरुत।
ವಸುದೇವನ ಪಾತ್ರ ಚಿತ್ರಣವನ್ನು ಬರೆಯಿರಿ.
Sketch the character of Vasudeva.

III. द्वौ श्लोकौ सतात्पर्यम् अनुवादत। **(2×6=12)**

**ಎರಡು** ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ತಾತ್ಪರ್ಯ ಬರೆಯಿರಿ.

Translate and explain **any two** of the following Slokas.

1) भ्रमति नभसि विद्युच्चण्डवातानुविद्धै-
नर्वजलदनिनादैर्मेदिनी सप्रकम्पा।
इह तु जगति नूनं रक्षणार्थं प्रजाना -
मसुरसमितिहन्ता विष्णुरद्यावतीर्ण: ।।

2) कोऽयं विनिष्पतति गर्भगृहं विगाह्य
उल्कां प्रगृह्य सहसाञ्जनराशिवर्ण:।
भीमोग्रदंष्ट्रवदनो ह्यहिपिङ्गलाक्ष:
क्रोधो महेश्वरमुखादिव गां प्रपन्न:।।

3) किं गर्जसे भुजगतो मम गोवृषेन्द्र।
पातप्रवृद्ध इव वार्षिककालमेघः।
एहि क्षिपामि धरणीतलमभ्युपेहि
वज्राहतस्तट इवाञ्जनपर्वतस्य।।

4) मर्त्येषु जन्म विफलं मम तानि घोषे
कर्माणि चाद्य नगरे धृतये न तावत्।
यावन्न कंसहतकं युधि पातयित्वा
जन्मान्तरासुरमहं परिकर्षयामि

IV. अनयोः **एकं** गद्य भागम् अनुवादत। **(1×8=8)**

ಒಂದನ್ನು ಅನುವಾದ ಮಾಡಿ.

Translate **any one** of the passages.

1) अहो तमसः प्रभुत्वम्। नाहं गन्तुं समर्थः। अये दीपिकालोकः। किन्नु खलु दुरात्मा कंसो ममापक्रमणं ज्ञात्वा दीपिकाभिः परिवृतो मां ग्रहीतुमागतो भवेत्। भवत्वहमस्य दर्पप्रशमनं करोमि। (खड्गमुत्कोशयति। निवृत्यावलोक्य) अये न कश्चिद् दृश्यते।

2) अरिष्टर्षभः – तेन हि प्रवर्ततां युद्धम्।
दामोदरः – भो गोवृषाधम ! यदि ते शक्तिरस्ति, मां पादेनैकेन स्थितं स्थानात् कम्पय।
अरिष्टर्षभः – कोऽत्र संशयः। (तथा कर्तुं चेष्टयित्वा मूर्छितः पतति।)
दामोदरः – भो गोवृष ! समाश्वासिहि समाश्वासिहि। अनेन वीर्येण भवान् गर्वितः।
अरिष्टर्षभः – (आश्वस्य, आत्मगतम्) अहो दुष्प्रसह्योऽयं बालः।

V. **चतुर्णां** वाक्यानामर्थं ससन्दर्भं विवृणुत। **(4×4=16)**

ನಾಲ್ಕು ವಾಕ್ಯಗಳ ಅರ್ಥವನ್ನು ಸಂದರ್ಭ ಸಹಿತ ವಿವರಿಸಿ.

Annotate **any four** of the following sentences.

1) यत्र दैव विधास्यति, तत्र बालं गृहीत्वापक्रामामि।
2) असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता।
3) ज्ञायतां कस्य पुत्रोऽयं किं वा जन्मप्रयोजनम्।
4) किं दष्टः कृष्णसर्पेण बालेन न निहन्यते।
5) तदिदानीमेव विषं संहृत्य यमुनाह्रदान्निष्क्रमामि।
6) कंसासुरं च यमलोकमहं नयामि।

VI. द्वौ अधिकृत्य लघुटिप्पर्णी लिखत। (2x5=10)

ಎರಡನ್ನು ಕುರಿತು ಲಘು ಟಿಪ್ಪಣಿ ಬರೆಯಿರಿ :

Write short notes on **any two** of the following :

1) वृद्धगोपालक: ।

2) शाप: ।

3) प्रवेशक: ।

VII. इमं परिच्छेदं पठित्वा प्रश्नानामुत्तराणि लिखत। 15

यस्य च मनुजस्य शारीरिक: मानसिको वा रोग: कोऽपि न भवति स: अरोग: इत्युच्यते। अरोगस्य भाव: आरोग्यम् अर्थात् रोगरहितत्वम्। यस्य रोग: न विद्यते तस्य आरोग्यमस्तीति ज्ञायते। वस्तुतस्तु सर्व: आरोग्यवानेव भवति। आरोग्यस्य अभाव: रोग(:) इति वक्तुमुचितम्। रोग: कश्चन विकार:। अयं शरीरस्य अथवा मनस: अपि भवति। शारीरिकेण रोगेण मनोरोग:, मनस: विकारेण शारीरिक: रोग: अपि कदाचित् सम्भवति। आरोग्यवत: मनुजस्य चित्तमपि शुद्धं पटु च भवति। उक्तमस्ति प्राचीनै: शुद्धे चित्ते बुद्धय: सम्भवन्तीति। अत: आरोग्यं सर्वस्यापि अपेक्षितम्।

1) आरोग्यशब्दस्य क: अर्थ: ?

2) आरोग्यरहितं किमिति कथयन्ति ?

3) चित्तविकारेण कदाचित् किं भवति ?

4) आरोग्यवत: चित्तं कथं भवति ?

5) प्राचीनै: किमुक्तमस्ति ?